# ISWK SHARING KNOWLEDGE

## Class - VII

## Subject- Sanskrit 3rd Language

**पाठः - वार्तालापः**

By- Geethu praseed

# वार्तालाप:

अम्बिका – सारिके! त्वं कुत्र गच्छसि?
सारिका – अम्बिके! अहं स्वमातुलस्य गृहं गच्छामि।
अम्बिका – तव मातुलस्य गृहं कुत्र अस्ति?
सारिका – मम मातुलस्य गृहं कमलानगरे अस्ति।
अम्बिका – कमलानगरे एव मम पितामहस्य गृहम् अस्ति।
सारिका – तत्र 'अम्बा' नाम्ना चित्रागारम् अस्ति, तस्य पृष्ठतः एव मम मातुलस्य गृहम् अस्ति।
अम्बिका – तत्र एव मम पितामहस्य गृहम् अपि अस्ति। अहम् अपि यदा-कदा तत्र गच्छामि।
सारिका – अहम् अधुना एव गच्छामि।




© New Saraswati House (India) Private Limited

**अम्बिका** – किं तत्र किमपि प्रयोजनमस्ति?

**सारिका** – आम्! अद्य राहुलस्य जन्मदिवसम् अस्ति। तत्र उत्सवस्य आयोजनं भवति। त्वमपि मया सह चल।

**अम्बिका** – न, न! अहं विद्यालयस्य पुस्तकालयं पुस्तकानि आनेतुं गच्छामि।

**सारिका** – परम् अद्यत्वे अवकाशाः सन्ति। त्वं किमर्थं विद्यालयं गमिष्यसि?

**अम्बिका** – अस्माकम् अवकाशाः सन्ति। परं विद्यालयस्य कार्यालये पुस्तकालये च कार्याणि भवन्ति।



**सारिका** – अद्य तु अहं मातुलस्य गृहं गच्छामि। श्वः अहम् अपि चलिष्यामि।

**अम्बिका** – सारिके! श्वः अहम् अपि त्वया सह गमिष्यामि। परम् अद्य तु अहं पुस्तकालयं प्रति गच्छामि एव।

**सारिका** – भवतु! त्वं गच्छ। अहम् अपि चलिष्यामि अन्यथा माता क्रोत्स्यति। श्वः मेलिष्यावः तदा पुस्तकालयं गमिष्यावः।

© New Saraswati House (India) Private Limited



# शब्द-शक्तिः (Word Meanings)

| | | | | | |
|---|---|---|---|---|---|
| मातुलः | – मामा | maternal uncle | आयोजनम् | – आयोजन | celebration |
| चित्रागारम् | – सिनेमा हाल | cinema hall | आनेतुम् | – लाने के लिए | for bringing |
| प्रयोजनम् | – काम | purpose | क्रोत्स्यति | – (वह) क्रोध करेगी | (she) will be angry |

## नई धातुएँ (New Roots)

| | | | | | |
|---|---|---|---|---|---|
| क्रुध् | – क्रोध करना | to be angry | मिल् | – मिलना | to meet |

## नए अव्यय (New Indeclinables)

| | | | | | |
|---|---|---|---|---|---|
| पृष्ठतः | – पीछे | behind | अद्यत्वे | – आजकल | now a days |
| यदा-कदा | – जब कभी | sometimes | किमर्थम् | – किसलिए | why |
| अधुना | – अब | now | श्वः | – कल (आने वाला) | tomorrow |
| किमपि | – कुछ | some | प्रति | – की ओर | towards |
| अद्य | – आज | today | अन्यथा | – नहीं तो | otherwise |
| सह | – साथ | with | तदा | – तब | then |

# लृट्लकार: (Future tense)



## पठ् (पढ़ना) धातो: लृट् लकार:

| | | | |
|---|---|---|---|
| **प्रथमपुरुष:** | - पठिष्यति | पठिष्यत: | पठिष्यन्ति |
| | (वह पढ़ेगा) | (वे दो पढ़ेंगे) | (वे सब पढ़ेंगे) |
| **मध्यमपुरुष:** | - पठिष्यसि | पठिष्यथ: | पठिष्यथ |
| | (तुम पढ़ोगे) | (तुम दो पढ़ोगे) | (तुम सब पढ़ोगे) |
| **उत्तमपुरुष:** | - पठिष्यामि | पठिष्याव: | पठिष्याम: |
| | (मैं पढ़ूँगा) | (हम दो पढ़ेंगे) | (हम सब पढ़ेंगे) |

## खाद् (खाना) धातोः लृट् लकारः

| | | | |
|---|---|---|---|
| **प्रथमपुरुषः** - | खादिष्यति | खादिष्यतः | खादिष्यन्ति |
| **मध्यमपुरुषः** - | खादिष्यसि | खादिष्यथः | खादिष्यथ |
| **उत्तमपुरुषः** - | खादिष्यामि | खादिष्यावः | खादिष्यामः |

| मूलधातु | | लट् लकारे | लृट् लकारे |
|---|---|---|---|
| कूर्द् | Jump | कूर्द्ति | कूर्दिष्यति |
| पत् | Fall | पतति | पतिष्यति |
| खाद् | Eat | खादति | खादिष्यति |
| लिख् | Write | लिखति | लेखिष्यति |
| पा (पिब्) | Drink | पिबति | पास्यति |
| गा (गाय्) | Sing | गायति | गास्यति |
| दृश् (पश्य्) | See | पश्यति | द्रक्ष्यति |
| गम् (गच्छ्) | Go | गच्छति | गमिष्यति |
| स्था (तिष्ठ्) | Sit | तिष्ठति | स्थास्यति |



# अभ्यास

## सम्प्रति लेखनीयम्

**1. निम्नलिखितानि वाक्यानि लृट्लकारे लिखत।**

(निम्नलिखित वाक्यों को लृट् लकार (भविष्यत् काल) में लिखिए। Write the following sentences into future tense.)

**उदाहरणम्–** ते किं **खादन्ति**? ते किं **खादिष्यन्ति**?

(क) युवां कस्मिन् गृहे **तिष्ठतः**?

(ख) वानराः वृक्षेषु **कूर्दन्ति**।

(ग) अहं मित्रेण सह विद्यालयं **गच्छामि**।

(घ) यूयं किं **लिखथ**?

(ङ) त्वं निर्मलं जलं **पिबसि**।

(च) बालिकाः गीतानि **गायन्ति**।

**2. एकपदेन उत्तरत।**

(एक पद में उत्तर दीजिए। Answer in one word.)

(क) सारिका **कुत्र** गच्छति?

(ख) तत्र **कस्य** जन्मदिवसम् अस्ति?

(ग) अम्बिका पुस्तकानि आनेतुं **कुत्र** गच्छति?

(घ) अवकाशदिवसे कुत्र **कार्यं** भवति?

© New Saraswati House (India) Private

## भाषा-अवबोधनम्

**1. उचितं मेलनं कुरुत।**

(उचित मिलान कीजिए। Match the following.)

| | |
|---|---|
| (क) बालौ | (*i*) भोजनं खादिष्यति |
| (ख) यूयम् | (*ii*) पुस्तकं पठतः |
| (ग) सः | (*iii*) किमर्थं गच्छथ |
| (घ) सिंहः | (*iv*) स्थास्यसि |
| (ङ) त्वम् | (*v*) उपविशन्ति |
| (च) बालिकाः | (*vi*) गर्जति |

**2. लृट्लकारस्य पदानि चिनुत।**

(लृट् लकार (भविष्यत् काल) के क्रियापदों को छाँटिए। Select the verb forms used in future tense.)

(क) यदा मध्याह्ने अर्धावकाशः भविष्यति तदा वयं वृक्षाणां छायायां स्थास्यामः स्व-अल्पाहारं च खादिष्यामः।

..................................................................................................................................

(ख) त्वं मह्यं फलं दास्यसि तदा अहमपि तुभ्यं 'चाकलेट' इति दास्यामि। यदि किंचित् दास्यसि तर्हि अधिगमिष्यसि।

..................................................................................................................................

**3. कोष्ठकात् उचितेन पदेन वाक्यानि पूरयत।**

(कोष्ठक में से उचित शब्द द्वारा वाक्यों को पूरा कीजिए। Complete the sentences with appropriate words from the brackets.)

| | |
|---|---|
| (क) अहं जलं ....................................। | (पिबिष्यामि, पास्यामि) |
| (ख) यूयं पत्राणि ....................................। | (लेखिष्यथ, लिखिष्यथ) |
| (ग) श्वः रविवासरः ....................................। | (आसीत्, भविष्यति) |
| (घ) ते भोजनं ....................................। | (भक्षिष्यन्ति, भक्षयिष्यन्ति) |
| (ङ) आवां चलचित्रं ....................................। | (द्रक्ष्यावः, दर्शयिष्यावः) |

Saraswati House (India) Private Limited

## मूल्यपरकम्

1. पुस्तकालये तूष्णीं तिष्ठेयम् कोलाहलं करणीयम् वा? (पुस्तकालय में शांति से बैठना चाहिए या शोरगुल करना चाहिए?)
2. किम् त्वम् अम्बायाः आज्ञां पालयसि अथवा स्वेच्छानुसारम् आचरसि? (क्या तुम माता की बात मानते हो या अपनी इच्छानुसार ही काम करते हो?)

# उत्तराणि

## सम्प्रति लेखनीयम्

1. निम्नलिखितानि वाक्यानि लृट्लकारे लिखत |

क) युवां कस्मिन् गृहे स्वास्यथः ।

ख ) वानराः वृक्षेषु कूर्दिष्यन्ति |

ग ) अहं मित्रेण सह विद्यालयं गमिष्यामि ।

घ ) यूयं किं लेखिष्यथः।

ङ ) त्वं निर्मलं जलं पास्यसि |

च ) बालिकाः गीतानि गास्यन्ति |

# उत्तराणि –सम्प्रति लेखनीयम्

**1. निम्नलिखितानि वाक्यानि लृट्लकारे लिखत |**

क) युवां कस्मिन् गृहे **स्वास्यथः** ।
ख ) वानराः वृक्षेषु **कूर्दिष्यन्ति** |
ग ) अहं मित्रेण सह विद्यालयं **गमिष्यामि**।
घ ) यूयं किं **लेखिष्यथ:** ।
ङ ) त्वं निर्मलं जलं **पास्यसि** |
च ) बालिकाः गीतानि **गास्यन्ति** |

**2. एक पदेन उत्तरत ।**

(क) कमलानगरम
(ख) राहुलस्य
(ग) पुस्तकालयम्
(घ) पुस्त्कालये

## भाषा –अवबोधनम्

**1. उचितं मेलनं कुरुत ।**

(क) बालौ - पुस्तकं पठतः ।
(ख) यूयम् - किमर्थं गच्छथ ।
(ग) सः - भोजनं खादिष्यन्ति ।
(घ) सिंहः - गर्जति ।
(ङ) त्वम् - स्थास्यसि ।
(च) बालिका –उपविशन्ति ।

**2. लृट् लकारस्य पदानि चिनुत ।**

(क) भविष्यति, स्थास्याम:, खादिष्याम:
(ख) दास्यसि, दास्यामि, दास्यसि, अधिगमिष्यसि ।

3. कोष्ठकात् उचितेन पदेन वाक्यानि पूरयत | (Complete the sentences with appropriate words from the brackets.)

(क) अहं जलं पास्यामि | (ख) यूयं पत्राणि लेखिष्यथ |

(ग) श्व: रविवासर: भविष्यति | (घ) ते भोजनं भक्षयिष्यन्ति |

(ङ) आवां चलचित्रं द्रक्ष्याव: |

मूल्यपरकम्

1.पुस्तकालये तूष्णीं तिष्ठेयम् |

2. अहं अम्बाया: आज्ञां पालयामि |


धन्यवाद

